नवमः पाठः

# बिहारस्य सांस्कृतिकं वैभवम्

[बिहारः सांस्कृतिकनिधिसम्पन्नं राज्यम्। इदं न केवलं धर्म-दर्शन-ज्योतिष-व्याकरणादिशास्त्राणां भूमिः अपितु संगीत-नृत्य-चित्र प्रभृतीनां कलानामपि विकासस्थलम्। अत्र प्रचलिताः विविधाः सांस्कृतिकाः क्रियाकलापाः पुरुषार्थ चतुष्टयेन सम्बद्धा आत्मानुरञ्जकाश्च। कलानां वृद्धौ राज्यस्य सांस्कृतिकसमृद्धौ च अत्रत्यानां सर्वेषां धर्मानुयायिनां विविधानां जातीनाञ्च योगदानम्]

संगीतं कलासु प्रमुखम्। गीतं नृत्यं त्र वाद्यं च चयं संगीतमुच्यते। देवाराधनस्य पुरुषार्थसम्प्राप्तेः प्रमुखं साधनमेतत्। एतदर्थं लोकजीवनस्य अभिन्नम् अङ्गमिदम्। जनैः समायोजितेषु संस्कारोत्सवेषु तत्तद्भावपुरस्सरं गीतानि गीयन्ते। तानि च गीतानि संस्कारगीतानि कथ्यन्ते। तेषु मुण्डन -यज्ञोपवीत - विवाह -कोहवर -सोहर - समदाओन-गीतानि मुख्यानि। अत्र संगीत-परम्परायां केचिद् विशिष्टाः साधकाः अभवन्। तेषु स्वनामधन्याः पण्डित रामचतुर–मल्लिक-पण्डित सियाराम तिवारी– प्रभृतयः विश्वविश्रुताः।

नृत्यं भाव-प्रकाशकं वर्तते। आचार्यज्योतिरीश्वर ठक्कुरेण 'वर्णरत्नाकरे' नृत्यस्य लास्य-ताण्डव सम्भा-हल्लीस-रासकेति बहवो भेदाः कथिताः। तत्र लास्यं माधुर्यभावसूचकं भवति।

अस्मिन् राज्ये लोकनृत्यस्य प्राचीना परम्परा। सर्वेषु अञ्चलेषु स्व-स्वलोकनृत्यानि प्रसिद्धानि। तत्र मिथिलायां जटजटिन सामा चकेवा-मिझिया-होली कमलापूजेति नृत्यप्रकाराः प्रचलिताः। एवमेव अञ्चलान्तरेष्वपि बहूनि लोकनृत्यानि। यथा मगधमण्डले 'खेलडिन'-डोमकचादयः भोजपुरमण्डले नेटुआ-जोगीरा-चैता-गौंड इत्यादयः नृत्यभेदाः प्रसिद्धाः।

नाट्यं जनरुचिवर्द्धकं लोकाराधनक्षमं विज्ञैः पञ्चमो वेदः कथ्यते। अत्र राज्ये विशिष्टेषु समारोहेषु पूजनावसरेषु च जनैः ऐतिहासिकवृत्तमिश्रितानि सामाजिकानि च नाट्यानि सोत्साहं प्रस्तूयन्ते जनैश्च बहुमन्यन्ते। गीत-नृत्यसमन्वितानि लोकनाट्यान्यपि प्रचलितानि। यथा मिथिलायां

रामलीला-किरतनिया-विदापत प्रभृतीनि नाट्यानि। भोजपुरी-अञ्चले भिखारी ठाकुरस्य 'विदेशिया' इति नामकं लोकनाट्यम् अतीव लोकप्रियम्।

राज्येऽस्मिन् सर्वेषु अञ्चलेषु चित्रकलायाः प्रचलनं संस्कारकार्येषु दृश्यते। मिथिलाक्षेत्रे देवपूजनावसरे संस्कारोत्सवेषु च स्त्रीभिः भूमौ 'अल्पना' भित्तिचित्राणि च निर्मीयन्ते। तानि च चित्राणि प्रायः गृहे प्राङ्गणे, भित्तौ, तुलसीचत्वरे कोवरगृहे च रच्यन्ते। इयं हि चित्रकला इदानीं मिथिला चित्रकला-नाम्ना विख्याता जाता। अस्यां चित्रविद्यायां कुशलाः पद्मश्री सम्मानिताः जगदम्बा–महासुन्दरी– प्रभृतयः स्त्रियः बिहारराज्यस्य गौरवभूताः।

मूर्तिकला अपि राज्यस्य वैभवम्। अत्र मृन्मयानि विविधवस्तुरचितानि च क्रीडनकानि आपणेषु बहुधा दृश्यन्ते। धार्मिकावसरेषु च प्रायः मूर्तिकलाविद्भिः तृण-कर्गद-मृद्भिः संरचिताः देवमूर्तयः स्थाप्यन्ते जनैः पूज्यन्ते च। कुम्भकारैः मृत्तिकानिर्मिताः गजानां घोटकानाञ्च मूर्तयः विवाहावसरेषु विशेषतः मण्डपाभ्यन्तरे स्थाप्यन्ते।

वस्तुतः बिहारः भारतवर्षे सांस्कृतिकदृष्ट्या गौरवमयं पदं धारयति।

## शब्दार्थाः

| | | |
|---|---|---|
| **सांस्कृतिकम्** | सांस्कृतिसम्बद्धम् | संस्कृति या परंपरा से जुड़ा हुआ |
| **वैभवम्** | ऐश्वर्यम् | सम्पत्ति, धरोहर |
| **पुरुषार्थः** | जीवनलक्ष्याणि | मानव जीवन के उद्देश्य |
| **वाद्यम्** | ध्वनिजनकम् उपकरणम् | बाजा |
| **देवाराधनायाः** | देवपूजायाः | देवता की आराधना |
| **अभिन्नम्** | अद्वितीयम् सम्बद्धम् | अभिन्न/ जुड़ा |
| **साधकाः** | साधनां कुर्वन्तः | साधना में लगे |
| **विश्वविश्रुताः** | जगत्प्रसिद्धाः | संसार में चर्चित |
| **भावप्रकाशकम्** | भावद्योतकम् | भावों को प्रकट करने वाला |
| **लोकाराधनम्** | जनतुष्टिकरम् | सबके लिए सुखकर |
| **वृत्तम्** | कथानकम् | कथा |

| | | |
|---|---|---|
| **अल्पना** | विशिष्ट रेखाचित्रम् | अरिपन/ अल्पना |
| **मृन्मयानि** | मृत्तिकानिर्मितानि | मिट्टी से बने |
| **क्रीडनकम्** | खेलोपकरणम् | खिलौना |
| **कर्गद:** | लेखनाधार: | कागज |
| **आपणेषु** | हट्टेषु | दुकानों में, बाजारों में |

## व्याकरणम्

### 1. सन्धिविच्छेद:

**आत्मानुरञ्जकाश्च** – आत्मा + अनुरञ्जका: + च

**धर्मानुयायिनाम्** – धर्म + अनुयायिनाम्

**सम्प्राप्तेश्च** – सम् + प्राप्ते: + च

**संस्कारोत्सवेषु** – संस्कार + उत्सवेषु

**पूजनोत्सवेषु** – पूजन + उत्सवेषु

**वृत्ताश्रितानि** – वृत्त + आश्रितानि

**राज्येऽस्मिन्** – राज्ये + अस्मिन्

**मण्डपाभ्यन्तरे** – मण्डप + अभ्यन्तरे

### 2. समास:

**देवाराधनम्** – देवानाम् आराधनम् (षष्ठी तत्पु०)

**संस्कारोत्सवेषु** – संस्काराणाम् उत्सवा: तेषु (षष्ठी तत्पु०)

**विश्वविश्रुता:** – विश्वस्मिन् विश्रुता: (सप्तमी तत्पु०)

**लोकाराधनम्** – लोकानाम् आराधनम् (षष्ठी तत्पु०)

**जनरुचिवर्धकम्** – जनानां रुचीनां वर्द्धकम् (षष्ठी तत्पु०)

**विविधवस्तुरचितानि** – विविधै: वस्तुभि: रचितानि (कर्मधारय, तृतीया तत्पु०)

**मण्डपाभ्यन्तरे** – मण्डपानाम् अभ्यन्तरे (षष्ठी तत्पु०)

## अभ्यासः ( मौखिकः )

1. **अधोलिखितानां प्रश्नानाम् उत्तराणि एकैनैव पदेन वदत–**

(क) कलासु प्रमुखं किम्?

(ख) 'जट-जटिन' इति लोकनृत्यम् कस्मिन् अञ्चले प्रसिद्धम्?

(ग) नाट्यं कतमो वेदः कथ्यते?

(घ) पद्मश्री जगदम्बा देवी कस्यां कलायां प्रसिद्धा?

(ङ) मण्डपाभ्यन्तरे केषां मूर्त्तयः स्थाप्यन्ते?

## अभ्यासः ( लिखितः )

1. **अधोलिखितानां प्रश्नानाम् उत्तराणि संस्कृतभाषया पूर्णवाक्येन लिखत–**

(क) किं नाम संगीतम्?

(ख) लास्यं कीदृशं नृत्यम्?

(ग) भोजपुरी अञ्चले कस्य किं नाम च नाटकं प्रसिद्धम्?

(घ) संगीतकलायां प्रसिद्धाः साधकाः के आसन्?

(ङ) कस्मिन् अवसरे काभिश्च चित्राणि निर्मीयन्ते?

2. **अधोलिखितप्रश्नानाम् उत्तराणि लिखत–**

(क) संगीतं कलासु प्रमुखं कथम्?

(ख) राज्यस्य अञ्चलेषु प्रसिद्धानां लोकनृत्यानां नामानि लिखत।

(ग) मिथिला-चित्रकलायाः परिचयं दत्त।

(घ) धार्मिकदृष्ट्या मूर्तिकलायाः किं महत्वम्?

(ङ) बिहारस्य सांस्कृतिकं महत्वं वर्णयत।

3. 'क' स्तम्भे प्रदत्तानां पदानां 'ख' स्तम्भे लिखितपदैः सह समुचितं मेलनं कुरुत–

| क | ख |
| --- | --- |
| झिझिया | गीतम् |
| अल्पना | नृत्यम् |
| क्रीडनकम् | चित्रकला |
| भिखारी ठाकुरः | मूर्तिकला |
| समदाओन | नाट्यम् |

4. अधोलिखितेषु पदेषु धातुयुक्तम् उचितं प्रत्ययं निर्दिशत–

(क) **नृत्यम्** – Öनृत् + ल्यप्/ क्यप्

(ख) **वाद्यम्** – Öवद् + यत्/ ण्यत्

(ग) **साधनम्** – Öसाध् + घञ्/ ल्युट्

(घ) **भिन्नम्** – Öभिद् + क्त/ ल्युट्

(ङ) **जातम्** – Ö जन् + घञ्/ क्त

5. निम्नलिखितेषु पदेषु उपसर्गं धातुं च पृथक्कृत्य समुचितप्रत्ययरूपं लिखत–

(क) संगीतम् सम् + गै (गी) क्त्वा/ क्त

(ख) सम्प्राप्तिः सम् + प्र + आप्तुमुन्/ क्तिन्

(ग) संस्कृतिः सम् + कृ क्तिन्/ तुमुन्

(घ) विश्रुतः वि + श्रु यत्/ क्त

(ङ) प्रस्तोतव्यम् प्र + स्तु ल्यप्/ तव्यत्

(च) प्रस्तुतम् प्र + स्तु क्त/ ल्यप्

Ö. अधोलिखितवाक्येषु रेखाङ्कि.तपदानां समुचितां विभक्तिं निर्दिशत–

(क) संगीतं कलासु प्रमुखम्। (**षष्ठी/ सप्तमी**)

(ख) 'सोहर' इति संस्कारगीतस्य भेद:। (**तृतीया/ षष्ठी**)

(ग) नाट्यं पञ्चमो वेद: कथ्यते। (**प्रथमा/ द्वितीया**)

(घ) संगीतं संस्कृते: अभिन्नम् अङ्गम्। (**तृतीया/ षष्ठी**)

(ङ) कुम्भकारै: निर्मिता: गजानां मूर्त्तय:। (**चतुर्थी/ तृतीया**)

## योग्यता-विस्तार:

### गीतम्

शार्ङ्गदेव: संगीतरत्नाकर ग्रन्थस्य रचयिता। तेन संगीतस्य माहात्म्यसम्बन्धे उक्तम्–

**गीतेन प्रीयते देव: सर्वज्ञ: पार्वतीपति: ।**
**गोपीपतिरनन्तोऽपि वंशध्वनिवशंगत: ॥**
**तस्य गीतस्य माहात्म्यं के प्रशंसितुमीशते ।**
**धर्मार्थकाममोक्षाणामिदमेवैकसाधनम् ॥**

### ध्रुवपदम्

दरभंगा परम्पराया: ध्रुवपदगायकेषु रामचतुर मल्लिक: क्षितिपाल मल्लिक: सियाराम तिवारी चेत्यादय: कलाकारा: प्रसिद्धा:।

### नृत्यं नृत्तञ्च

'अन्यद्भावाश्रयं नृत्यं नृत्तं ताललयाश्रयम्। 'ताण्डवनृत्यकाले शिवस्य ढक्काया: अइउण् इत्यादीनि चतुर्दश सूत्राणि निर्गतानि। यथा चोक्तम्–

**नृत्यावसाने नटराजराजो**



केषाञ्चन लोकनृत्य

1. जट जटिन –

2. झिझिया –

3. कमलापूजा –

छात्रै: करणीयम्

छात्रै: स्वस

विशेषज्ञै: स